**ब्रह्मप्रज्ञा {BrahmaPrajna}**
*(A Multidisciplinary and Multilingual Peer-reviewed Journal)*
*Published by:* Vedanta Vibhag, Valmeeki Vidyapeeth,
Email: vedantavibhag@gmail.com. ISSN: 2795-1960 (Print)

# महापुराणेषु चिकित्साविज्ञानम्

**सहप्रा. डा. जनार्दन उपाध्यायः**
वाल्मीकिविद्यापीठम्
Email: dr.janardan2019@gmail.com

## सारसंक्षेपः

*पौरस्त्यवाङ्मयभाण्डागारेषु पुराणानां महत्त्वं जगत्यस्मिन् विद्यमानेषु सर्वेष्वेव विषयेषु महनीयतरं वर्तत इति पूर्वसूरिभिः प्रतिपादितो विषयः। मानवजीवने चतुर्वर्गसाधनभूता विषया सर्वेष्वेष पुराणेषु वर्तत इति निश्चप्रचं वक्तुं शक्यते। अत्र खलु केवलं चिकित्साविज्ञानसम्बद्धो विषय एव प्रतिस्थापितो वर्तते। पुराणवर्णितविषयाधारेणैव मानवजीवने सुस्वास्थ्यस्य महत्त्वं कति वर्तत इति विचार्य पुराणानि खल्वस्माकं कृते स्वास्थ्यक्षेत्रे कीदृशं स्थानमाकलयन्तीति विचार्य तत्र समुल्लिखितानां चिकित्सापरकाणां परिचयप्रदानकार्यं संक्षेपेण समुल्लिखितमस्ति।*

*अत्र विविधानामोषधीनां नामानि तथाधिभौतिकाधिदैविकाध्यात्मिकापदानां परिचयप्रदानकार्यं कृतमस्ति। तथैव मानवस्य बहिरङ्गोद्भवानां रोगाणां लक्षणनिदानोपचारविधीनां तथान्तरङ्गे समुद्भूतानां रोगाणां लक्षणनिदानोपचारविधीनां तथैव पशुचिकत्सासम्बद्धविषयस्य वृक्षायुर्वेदस्य च परिचयप्रदायका विषयाः समाविष्टाः सन्त्यत्र।*

**शब्दकुञ्जी**– आमयः, कासः, छर्दनम्, श्लक्ष्णम्, अभया।

## अध्ययनविधिः

अस्मिन् लेखे विधिद्वयस्यावलम्बनं विहितमस्ति वर्णनात्मको विधिर्विश्लेषणात्मको विधिश्च।

## सैद्धान्तिकाधारः

अत्र खलु विषयसंयोजने सैद्धान्तिकाधाररूपेण संहिताग्रन्थेषु सुश्रुतसंहिता तथा चरकसंहिता गृहीता तु पौराणिकाधारग्रहणे चिकित्साविषयप्रतिपादकानि पुराणान्येव गृहीतानि सन्ति।

## पूर्वकार्यसमीक्षणम्

त्रिकालदर्शिना महर्षिणा वेदव्यासेन विरचितेषु ह्यष्टादशमहापुराणेषु कस्मिन् कस्मिन् पुराणे चिकित्साविषयिका चर्चा वर्तत इति विषयस्य सम्यग्रूपेण विवेचनं पूर्ववर्तिभिर्विद्वद्भिः कृतमिति नैवानुभूयते। परं केवलं गरुडपुराणे वर्णित-विषायाणां समग्ररूपेण हिन्दीभाषायामनुवादप्रकाशनप्रसङ्गे गीताप्रेसगोरखपुरद्वारा विक्रमाब्दस्य २०६१ तमे (पञ्चम-

संस्करणे) प्रकाशितायाः कल्याणपत्रिकाया गरुडपुराणविशेषाङ्के समग्रस्य गरुडपुराणस्य विषयप्रतिस्थापनकार्यं हिन्दी-भाषायां विहितमिति दृष्टिगोचरीभवति। तस्मिन्नेव प्रसङ्गे चिकित्साविषयस्याप्युपस्थापनं विहितमस्ति।

तत्र खलु सर्वप्रथमं रोगाणां निदाननिरूपणं तथा निदानशब्दस्यर्थप्रतिपादनं विहितमस्ति। ततश्च ज्वरनिदाननिरूपणं रक्तपित्तनिदाननिरूपणं कासनिदाननिरूपणं श्वासरोगनिदानं हिक्कारोगनिदानं राजयक्ष्मानिदानं अरुचिवमनरोगनिदानं हृद्रोगनिदानं तृषारोगनिदानं मदात्ययनिदानमर्शनिदानमतिसारग्रहणीनिदानं मूत्राघातनिदानं प्रमेहरोगनिदानं विद्रधि तथा गुल्मनिदानमुदररोगनिदानं पाण्डुशोथनिदानं विसर्परोगनिदानं कुष्ठरोगनिदानं कृमिनिदानं वातव्याधिनिदानं वातरक्तनिदान-मित्यादिविषयाः समुपवर्णिताः सन्ति। एवमेव वैद्यकशास्त्रस्य परिभाषापि गरुडपुराणे कृतेति समुदीरितमस्ति। तथैव पदार्थानां गुणदोषवर्णनपुरःसरमोषधीनामनुपानादिविषयाणामपि चर्चा विहितेति दृश्यते। ततश्च ज्वरातिसाररोगाणामुप-चारविधिः नाडीव्रणकुष्ठादिरोगाणां चिकित्सा स्त्रीरोगचिकित्सा पथ्यकारकसर्वौषधीनां वर्णनं विहितमस्ति। एवमेव मधुराम्लादिद्रव्याणां वर्णनं ब्राह्मीघृतनिर्माणविधि इत्यादिविषया परिचर्चिताः सन्ति। पुनश्च ज्वरचिकित्सा पलितकेशस्य तथा कर्णशूलस्योपचारविधिः नेत्र नासिकामुखकण्ठादिरोगाणां चिकित्सा शस्त्राघातादिजनितानां चिकित्सेत्यादिविषयस्य विषये गरुडपुराणमाधृत्य लिखितमस्ति। एवञ्च दन्तकर्णरोमशमनचिकित्सा वर्णिता दृष्टिगोचरीभवति। तथैवानेकरोग-सम्बद्धविविधरोगनाशकौषधीनां चिकित्सापद्धतिसम्बद्धविषायाणां विवेचनं विहितमस्ति।

किञ्च विविधानां दिव्यौषधीनां वर्णनं बुद्धिवृद्धिकरौषधीनां मन्त्रचिकत्सादिविषयाणामपि परिचर्चा कृतेति ज्ञायते। परमेते विषयाः केवलं गरुडपुराणवर्णितविषयसम्बद्धा एव सन्ति। एतेषां विषयाणां विवेचनं हिन्दीभाषायां विहितमिति नयनपथमायाति। (कल्याण, २०६१ संक्षिप्त गरुडपुराणाङ्कः, पञ्चमसंस्करणम्, गीताप्रेस, गोरखपुर)

## विषयप्रवेशः

प्रचीनार्यसूरिभिर्विरचितेषु वेदानां व्याख्यायितेषु संस्कृतवाङ्मयेषु पुराणवाङ्मयस्य स्थानं सर्वोपरि विद्यत इति निश्चप्रचं वक्तुं शक्यते। पुराणवाङ्मयेषु न केवलमेकस्यैव विषयस्य ज्ञानं लभ्यते। तत्र तु जगत्यस्मिन् विद्यमानानां सर्वेषामपि विषयाणां समावेशो विद्यत इत्यनुभूयते। धर्मार्थकाममोक्षसाधनभूताः सर्वेऽपि विषयाः पुराणेषु यत्रकुत्रापि प्राप्यन्ते। लेखेऽस्मिन् सर्वेषामपि प्राणिनां रुजभयापहस्य चिकित्सासम्बद्धविषयस्य समावेशोऽस्ति न वेति विषयस्य सन्देहनिवारणाय कस्मिन् कस्मिन् पुराणे चिकित्साविषयस्य चर्चा वर्तत इति विषयस्य प्रकाशनार्थं यत्र यत्र अस्य विषयस्य वर्णनं वर्तते तस्य तस्य पुराणस्याध्यनं कृत्वायुर्वेदपरकायां सुश्रुतसंहितायां तथा चरकसंहितायां वर्णितचिकित्सासम्बद्धप्रसङ्गस्योल्लेखः कस्मिन् कस्मिन् पुराणे प्राप्यत इति विषयस्य समीक्षा विहितास्ति।

### १) सुश्रुतसंहितासम्बद्धप्रसङ्गः

चिकित्साशास्त्रप्रतिपादकेषु ग्रन्थेषु सुश्रुतसंहिताया नाम बहुपरिचितमस्ति। तत्र मानवशरीरे समुद्भूतानां विविधाना-मसंख्यातानां रोगाणां लक्षणं तथा तेषां प्रत्येकानां रोगाणां प्रकार एवं तेषां लक्षणानाञ्च परिचयप्रदानपूर्वं प्रत्येकानां रोगाणां निदानस्य तथोपचारस्य च विस्तरेण वर्णनं विहितमस्ति। प्रत्येकस्य रोगस्य द्वे विधी विद्येते द्वन्द्वोत्पन्ना तथागन्तुकश्चेति। मानवशरीरे व्याधयो विविधैः कारणैः समुत्पद्यन्ते। इत्यादिविषयाणां विस्तरेण वर्णनं सुश्रुतसंहितायां समुल्लिखितमस्ति। शरीरे ज्वरोरोगः कथमुत्पद्यते तस्य भेदाश्च कति सन्तीति विषये लिखितं पद्यमेकमित्थमवलोकितुं शक्यते–

(दोषैः पृथक् समस्तैश्च द्वन्द्वैरागन्तुरेव च। अनेककारणोत्पन्नः स्मृतस्त्वष्टविधो ज्वरः॥

सुश्रुतः२०७७ सुश्रुतसंहिता, उत्तरतन्त्रम्, तन्त्रम १४–१५, चौखम्बा कृष्णदास अकादमी, वाराणसी)

अनेन मानवशरीरे विविधदोषोत्पन्नो ज्वरोरोगोऽष्टधा भवतीति विषयस्य प्रमाणीकरणे ग्रन्थोऽयं साहाय्यो भवति।

**२) चरकसंहितासम्बद्धप्रसङ्गः**

चरकसंहितायां ज्वरोरोगप्रकारप्रदर्शनक्रमे ज्वरोऽष्टविधेति स्फुटीभवति। तत्र सर्वप्रथमं सप्तविधज्वराद् विशिष्ट-लिङ्गोपक्रमसमुत्थानत्वाद् विशिष्टो ज्वरः साधारणेन कर्मणाष्टविधेति प्रतिपादितमस्ति। यथा च चरके–

(स सप्तविधाज्ज्वराद्विशिष्टलिङ्गोपक्रमसमुत्थानत्वाद्विशिष्टो वेदितव्यः, कर्मणा साधारणेन चोपचर्यते। इत्यष्टविधा ज्वरप्रकृतिरुक्ता॥३१॥चरकः वि सं २०७७ चरकसंहिता, निदानस्थानम्, अध्यायः १, सूत्रम् ३१, चौखम्बा कृष्णदास अकादमी, वाराणसी)

तत्रैव यद्यपि सन्तापलक्षणो ज्वरस्त्वेक एव भवति तर्हि तमेवाभिप्रायविशेषाद् विविधमाचक्षत इत्युल्लिखितमस्ति। पुनरुपभेदप्रदर्शनमपि विहितमस्ति यत्र निजागन्तुकविशेषात् वातादिवकल्पाच्च तत्र द्विविधं त्रिविधं चतुर्विधं सप्तविधं भिषज आहुरित्यप्युल्लिखितमस्ति। यथा च–

(ज्वरस्त्वेक एव सन्तापलक्षणः। तमेवाभिप्रायविशेषाद्विविधमाचक्षते, निजागन्तुविशेषाच्च। तत्र निजं द्विविधं त्रिविधं चतुर्विधं सप्तविधं चाहुर्भिषजो वातादिविकल्पात्॥ चरकः वि सं २०७७ चरकसंहिता, निदानस्थानम्, अध्यायः १, सूत्रम् ३२, चौखम्बा कृष्णदास अकादमी, वाराणसी)

एवमेव चरकसंहितायां शोथरोगस्याप्युत्पत्तिहेतुः का चेति समुल्लिख्य तस्य प्रकारश्चोपवर्णितोऽस्ति। शोथास्त्रि-विधा भवन्ति वातजाः पित्तजाः श्लेष्मजाश्चेति। शोधो द्विविधो निजागन्तुकश्च। अस्मिन् प्रसङ्गे पद्यमेकं द्रष्टुं शक्यते यथा–

(त्रयः शोथा भवन्ति वातपित्तश्लेष्मनिमित्ताः, ते पुनर्द्विविधा निजागन्तुभेदेन॥

चरकः वि सं २०७७ चरकसंहिता, सूत्रस्थानम्, अध्यायः १८, सूत्रम् २, चौखम्बा कृष्णदास अकादमी, वाराणसी)

**३) ब्रह्मपुराणवर्णितप्रसङ्गः**

सुश्रुतसंहिता चरकसंहिता तु केवलं चिकित्सापरकेति नयनगोचरीभवति। परं ब्रह्मपुराणे रोगशब्दस्य स्थाने ताप इत्युल्लिख्य स चाधिभौतिकाधिदैविकाध्यात्मिकभेदेन त्रिविधा इति समुदीरितमस्ति। मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः सरीसृपाद्यैश्च नृणां चाधिभौतिकस्तापो जायते। तथैव शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवस्तापश्चाधिदैविकः कथ्यते। पुनश्चाध्यात्मिकस्तापोऽपिद्विविधो भवतीति निगद्योपभेद इति समुदीरितमस्ति। आध्यात्मिकः तापः शारीरो मानसश्चेति द्विविधो भवतीति समुल्लिखितमस्ति। तत्र शारीरस्तापः शिरोरोगप्रतिश्यायज्वरशूलभगन्दरैर्गुल्मार्शश्वयथुश्वासच्छर्द्यादिभि-रनेकधा भवन्ति। तथैव मानसस्तु कामक्रोधभयद्वेषलोभमोहविषादशोकासूयावमानेर्ष्यामात्सर्याभिरनेकधा भवन्तीति प्रदर्शितमस्ति। आध्यात्मिकोऽपि द्विविधः शारीरो मानसश्च। शारीरो विविधैर्भेदैर्बहुविधोऽस्तीति श्रूयते। एवमेव शिरोरोग-प्रतिश्यायज्वरशूलभगन्दरगुल्मार्शः श्वयथुश्वासच्छर्द्यादिभिरनेकधाः सन्ति। तथाक्षिरोगातीसारकुष्ठाङ्गामयसंज्ञकास्तु देहजास्तापा मानसं भिद्यत इति श्रोतुमर्हथ। कामक्रोधभयद्वेषलोभमोहविषादजः शोकासूयावमानेर्ष्यामात्सर्याभिभवादयः। मानसा अपि चानेकधाः श्रेष्ठास्तापा भवन्ति। इत्येवमादिभिर्भेदैर्भिद्यते। उदाहरणार्थं लेखकस्य शब्देषु चेत्थमवलोकितुं शक्यते–

"मृगपक्षिमनुष्याद्यैः पिशाचोरगराक्षसैः। सरीसृपाद्यैश्च नृणां जायते चाधिभौतिकः॥

शीतोष्णवातवर्षाम्बुवैद्युतादिसमुद्भवः। तापो द्विजवरश्रेष्ठाः कथ्यते चाधिदैविकः॥" (व्यासः,, २०२० ब्रह्ममहा-पुराणम् अध्यायः १२६, श्लोकः ७–८, नागप्रकाशन, दिल्ली)

अपरप्रसङ्गे ब्रह्मपुराणस्यैव गौतमीमाहात्म्यस्थितिप्रकणान्तर्गते ४९ तमेऽध्याऽये तत्र सोमतीर्थवर्णनक्रमे विविध-कथोपकथनद्वारा ओषध्यः लोकमातर इति प्रमाणीकृत्वा सर्वेषां रोगाणां निराकरणक्षमा ओषध्यो लोकमातर इति चिकित्साविषयस्य वर्णनं विहितमस्ति। किञ्च ब्रह्माद्वारा निगदितं वचनं पुरस्कृत्य कथनमेतत् समुपवर्णितमस्ति। यथा च ब्रह्मपुराणे–

(जगतां मातरः पूर्वमोषध्यो जीवसंमताः। ममापि मातरो देव्यः पूर्वासां पूर्ववत्तराः॥२॥ व्यासः, २०२० ब्रह्ममहा-पुराणम्, गौतमीमाहात्म्यस्थितिप्रकणम्, अध्यायः ४९, श्लोकः २, नागप्रकाशन, दिल्ली)

**४) लिङ्गपुराणवर्णितप्रसङ्गः**

अस्मिन् पुराणे चिकित्सासम्बद्धस्य प्रसङ्गस्य विशदरूपेण वर्णनं नैव विहतमस्ति तर्हि संक्षेपेण मन्त्रौषधीनां वर्णनं कृतमस्ति। तत्र खलु द्विपञ्चाशत्तमेऽध्याये त्रिपञ्चाशत्तमेऽध्याये चतुःपञ्चाशत्तमेऽध्याये च वर्णनं विहितमस्ति। तत्र द्विपञ्चाशत्तमेऽध्याये वज्रेश्वरीविद्यासिद्धिविधानं प्रतिपादितमस्ति। तस्य विषये चेत्थं समुल्लिखितमस्ति–

(वश्यमाकर्षणं चैव विद्वेषणमतः परम्॥ उच्चाटनं स्तम्भनं च मोहनं ताडनं तथा। उत्सादनं तथा छेदं मारणं प्रतिबन्धनम्॥ व्यासः, २०७८ लिङ्गमहापुराणम्, उत्तरभागः, अध्यायः ५२, श्लोकः २–३, गीताप्रेस, गोरखपुर)

अस्यैव महापुराणस्य त्रिपञ्चाशत्तमेऽध्याये तु मृत्युञ्जयहवनविधानं परिवर्णितमस्ति। मृत्युञ्जयहवनं केन विधिना विधीयते कैर्द्रव्यैः क्रियत इति विषये स्पष्टतया लिखितमस्ति। तद्यथा–

(रुद्राध्यायेन विधिना घृतेन नियुतं क्रमात्॥ सघृतेन तिलेनैव कमलेन प्रयत्नतः। दूर्वया घृतगोक्षीरमिश्रया मधुना तथा॥ चरुणा सघृतेनैव केवलं पयसापि वा। जुहुयात्कालमृत्योर्वाप्रतीकारः प्रकीर्तितः॥ व्यासः, २०७८ लिङ्गमहा-पुराणम्, उत्तरभागः, अध्यायः ५३, श्लोकः २–४, गीताप्रेस, गोरखपुर)

पुनश्च चतुःपञ्चाशत्तमेऽध्याये मृत्युहरत्र्यम्बकमन्त्रस्य माहात्म्यं तथा व्याख्यानञ्च गरुडपुराणमाश्रित्य चर्चित-मस्ति। तत्र वर्णितविषयाधारेणायुर्वेदविदैस्त्रियम्बकेन मन्त्रेण वाणलिङ्गे देवदेवं त्रियम्बकं शङ्करं यथावदष्टोत्तरसहस्रेण पुण्डरीकेण पूजनं कर्तव्यमत्युल्लिखितमस्ति। किञ्च–

(त्रियम्बकेन मन्त्रेण देवदेवं त्रियम्बकम्। पूजयेद्वाणलिङ्गे वा स्वयम्भूतेऽपि वा पुनः॥

आयुर्वेदविदैर्वापि यथावदनुपूर्वशः। अष्टोत्तरसहस्रेण पुण्डरीकेण शङ्करम्॥ व्यासः २०७८ लिङ्गमहापुराणम्, उत्तरभागः, अध्यायः ५४, श्लोकः १–२, गीताप्रेस, गोरखपुर)

**५) अग्निपुराणवर्णितप्रसङ्गः**

अष्टादशमहापुराणेषु चिकित्साविज्ञानसम्बद्धविषयज्ञानाय महनीयतरं स्थानमस्त्यग्निपुराणस्य। अस्मिन् पुराणे २७९ अध्यायतः २९५ अध्यायपर्यन्तोभागश्चिकित्साविज्ञानसम्बद्धो वर्तते। सर्वप्रथमं सुश्रुतधन्वन्तरिसंवादप्रसङ्गमव-लम्ब्य २७९ तमेऽध्याये रोगीणां कृते भक्षाभक्षविषयस्य चर्चा विहितास्ति। सर्वप्रथमं भिषक् रोगिणो लङ्घितं ज्वरितं बलं रक्षन् तृड्ज्वरान्तं सविश्वं लाजमण्डं श्रृतं जलञ्च भोजयेत्। ततः व्यतिक्रान्ते च षडहे मुस्तपर्पटकोशीरचन्दनोदीच्यनागरै-स्तिक्तकं पाययेत्। पुनश्च त्यक्तदोषं तु तं स्नेहयेद्विरेचयेत्। ततो जीर्णाः षष्टिकनीवाररक्तशालिप्रमोदकाः पथ्या भवन्ति। एवंप्रकारेण मुद्गा मसूराश्चणकाः कुलत्थाः कुष्ठका आटक्यो नारकाद्याश्च ज्वरे इष्टा भवन्ति। एवमेव पटोलं सफलं निम्बं पर्पटं दाडिमं ज्वरे दातव्यम्। ऊर्ध्वगे ज्वरे विरेचनमधोगे च वमनं शस्तं भवति। परं रक्तगे तु शुण्ठिवर्जितं षडङ्गं पानमित्यादि-

वर्णनं कृतमस्ति। भिषक् ज्वरितं लङ्घितं रक्षन्बलं भोजयेत्। सविश्वं लाजमण्डं तु तृड्ज्वरान्तं श्रृतं जलं पथ्यं भवति। षडहे व्यतिक्रान्ते मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैर्ध्रुवम् तिक्तकं पाययेत्। ततः त्यक्तदोषं तु स्नेहयेत् तं च विरेचयेत्। जीर्णाः षष्टिकनीवाररक्तशालिप्रमोदकाः भवन्ति। तद्विधा भवति। ज्वरेष्विष्टा यवानां विकृतिस्तथा मुद्गा मसूराश्चणकाः कुलत्थाः कुष्ठका भवन्ति। ज्वर आटक्यो नारकाद्याश्च कर्कोटककटोल्बकम् पटोलं सफलं निम्बं पर्पटं दाडिमञ्चेति बोद्धव्यम्। यथा च–

"अधोगे वमनं शस्तमूर्ध्वगे च विरेचनम्। रक्तपित्ते तथा पानं षडङ्गं शुण्ठिवर्जितम्॥" व्यासः२०६७ अग्निपुराणम् अध्यायः २७९, श्लोकाः ३–८, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल)

ततश्च २८०तमेऽध्याये सर्वरोगहरौषधीनां परिचयप्रदानकार्यं कृतमस्ति। तत्र खलु उष्णं पित्तं सूक्ष्मः शीतश्चलो वायुः कटुत्रयम् स्थिराम्लस्निग्धमधुरं बलाशं चापि कथ्यते। एवमेवैतेषां विपरीतैस्तु विपर्ययो वृद्धिर्भवति। स्वाद्वम्ललवणा रसाः श्लेष्मला वायुनाशना भवन्ति। कटुतिक्तकषायाः श्लेष्मनाशना वातला भवन्ति। कट्वम्ललवणास्तु पित्तविवर्धना ज्ञेयाः। तथैव तिक्तस्वादुकषायाश्च पित्तविनाशना भवन्तीति वर्णनं विहितमस्ति। उदाहरणार्थं च यथा–

(सूक्ष्मः शीतश्चलो वायुः पित्तमुष्णं कटुत्रयम्। स्थिराम्लस्निग्धमधुरं बलाशं च प्रचक्षते॥

वृद्धिः समानैरेतेषां विपरीतैर्विपर्य्ययः। रसाः स्वाद्वम्ललवणाः श्लेष्मला वायुनाशनाः॥

कटुतिक्तकषायाश्च वातलाः श्लेष्मनाशना। कट्वम्ललवणा ज्ञेयास्तथा पित्तविवर्धनाः॥

तिक्तस्वादुकषायाश्च तथा पित्तविनाशनाः। रसस्यैतद् गुणं नास्ति विपाकस्यैतदिष्यते॥ व्यासः २०६७ अग्निपुराणम् अध्यायः २८०, श्लोकाः १७–२०, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

अस्यैव पुराणस्य २८१ तमेऽध्याये रसादिलक्षणं प्रतिपादितमस्ति। तत्र द्रव्यस्य विपाकः कट्वम्ललवणात्मकस्त्रिधा भवति। तथै वीर्यं तु शीतमुष्णञ्चेति द्विधा भवति। ओषधीनामनिर्देश्यप्रभावस्तु मधुरः कषायस्तिक्तश्च रसः। एते खलु शीतवर्या भवन्ति शेषास्तूष्णा भवन्ति। गुडूची तु तिक्तापि वीर्यतोऽत्युष्णा भवति। यथा च ग्रन्थे–

(त्रिधा विपाको द्रव्यस्य कट्वम्ललवणात्मकः। द्विधा वीर्य्यं समुद्दिष्टमुष्णं शीतं तथै व च॥

अनिर्देश्यप्रभावश्च ओषधीनां द्विजोत्तम। मधुरश्च कषायश्च तिक्तश्चैव तथा रसः॥

शीतवीर्य्याः समुद्दिष्टाः शेषास्तूष्णाः प्रकीर्तिताः। गुडूची तत्र तिक्तापि भवत्युष्णाति वीर्य्यतः॥ व्यासः२०६७ अग्निपुराणम् अध्यायः २८१, श्लोकाः ३–५, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

पुनश्चास्यैव पुराणस्य २८२ तमेऽध्याये वृक्षायुर्वेदस्य वर्णनं विहितमस्ति। तत्र को वृक्षो गृहात् कस्यां दिशि शुभा भवतीति विषयस्य चर्चा कृतास्ति। प्रसङ्गिममवलम्ब्य लिखितमस्ति प्लक्षश्चोत्तरतः शुभस्तु पुष्पितान् तिलान् गृहवाटे स्थाप्यताम्। अश्वत्थ वटश्चोत्तरे कण्टकद्रुमा दक्षिणं दिशमुत्पन्नाः शुभाः। चन्द्रं प्रपूज्य वृक्षान् गृह्णीयात् रोपयेच्चेत्यादि-विषयाः समाविष्टाः सन्ति। वृक्षायुर्वेदमाख्यास्ये प्लक्षश्चोत्तरतः शुभो भवति। क्रमेण प्राग्वटो याम्यतस्त्वाम्र आप्येश्वत्थः। दक्षिणं दिशमुत्पन्नाः कण्टकद्रुमाः। समीपे उद्यानं गृहवासे स्यात्तिलान्वाप्यथ पुष्पितान् गृह्णीयात् चन्द्रं प्रपूज्य वृक्षान्द्रोप-येत्। प्राजेशवैष्णवम् पञ्च वायव्यं हस्तं ध्रुवाणि नक्षत्राणि तथा मूलं द्रुमरोपणे शस्यन्ते प्रवेशयेन्नदीवाहान्पुष्करिण्यां कारयेत्। हस्तो मघा तथा मैत्रमाद्यं पुष्पं वासवं भवति। जलाशयसमारम्भे तु वारुणं चोत्तरात्रयञ्चेति। यथा चाग्निपुराणे–

"अशोकः कदली जम्बूस्तथा वकुलदाडिमाः। सायं प्रातस्तु घर्मर्त्तौ शीतकाले दिनान्तरम्॥

वर्षारात्रौ भुवः शोषे सेक्तव्या रोपिता द्रुमाः। उत्तमा विंशतिर्हस्ता मध्यमा षोडशान्तराः॥" व्यासः२०६७ अग्निपुराणम् अध्यायः २८२, श्लोकाः १–८, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

अस्यैव पुराणस्य २८३ तमेऽध्याये नानारोगहरौषधीनां नामानि परिवर्णितानि सन्ति। सयष्टिसैन्धव बालो मेधाकरं प्रातः पिवेत्। मुचां देवदारुमहाशिग्रुफलत्रयपयः। मृद्वीका सकृष्णा कल्कः क्वाथः सर्वान्कृमीन् हरेत्। भृङ्गविश्वानां मधु-सर्पिषोः रसेषु त्रिफला लशुनार्द्रकशिग्रूणां रसः कर्णस्य पूरणम् शोभनम्। आर्द्रकजाप्यं तैलं तु शूलहा तथौष्ठरोगनाशकं भवति।

(सयष्टिसैन्धव बालः प्रातर्मेधाकरं पिवेत्। देवदारुमहाशिग्रुफलत्रयपयोमुचाम्॥

क्वाथः सकृष्णा मृद्वीका कल्कः सर्वान्कृमीन् हरेत्। त्रिफलाभृङ्गविश्वानां रसेषु मधुसर्पिषोः॥

लशुनार्द्रकशिग्रूणां रसः कर्णस्य पूरणम्। तैलमार्द्रकजाप्यं वा शूलहा चौष्ठरोगनुत्॥ व्यासः२०६७ अग्निपुराणम्, अध्यायः २८३, श्लोकाः ५–८, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल)

पुनश्चास्यैव पुराणस्य २८५ तमेऽध्याये मृतसञ्जीवनीसिद्धिविषये लिखितमस्ति। तत्रापस्मारविनाशाय शङ्खपुष्पीवचाकुष्ठैः सिद्धं ब्राह्मीरसैर्युतं मेध्यमुत्तमं भवतीति लिखितमस्ति। यथा–

शङ्खपुष्पीवचाकुष्ठैः सिद्धं ब्राह्मीरसैर्युतम्। पुराणं हन्त्यपस्मारं सोन्मादं मेध्यमुत्तमम्॥ व्यासः२०६७ अग्निपुराणम् अध्यायः २८५, श्लोकः १९, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

पुनश्चास्यैव पुराणस्य २८६ तमेऽध्याये मृत्युञ्जयकल्पः प्रकाशितो वर्तते। तत्र क्षीरेण मधुना वा खण्डदुग्धभुग्नरः शतायुर्भवति। मध्वाज्यशुष्ठीं पलं प्रातः संसेव्य मनुष्यो मृत्युजिद्भवति। माण्डीकीचूर्णं दुग्धेन सह पीत्वा मनुष्यो बलीपलितहीनः सन् जीवति। मधुना सार्धं पयः कर्षं पीत्वा नरो मुत्युञ्जयति। यथा–

(क्षीरेण मधुना वापि शतायुः खण्डदुग्धभुक्॥ मध्वाज्यशुष्ठीं संसेव्य पलं प्रातः स मृत्युजित्। बलीपलित-जिज्जीवेन्माण्डूकीचूर्णदुग्धपाः॥ उच्चटा मधुना कर्षं पयःपा मृत्युजिन्नरः॥ व्यासः २०६७ अग्निपुराणम् अध्यायः २८६, श्लोकः ४–६, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

पुनश्च २८७ तमेऽध्याये गजचिकित्सायाः स्वरूपं प्रदर्शितमस्ति। रजनीभ्यां घृतं गोमूत्रञ्च पाण्डुरोगेषु हितकरं भवति। तैलसिक्तस्य निषेकोऽनाहे शस्यत इत्युल्लिखितमस्ति।

(गोमूत्रं पाण्डुरोगेषु रजनीभ्यां घृतं द्विज। आनाहे तैलसिक्तस्य निषेकस्तस्य शस्यते॥ व्यासः २०६७ अग्निपुराणम् अध्यायः २८७, श्लोकः ८, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

२८९ तमेऽध्यायेऽश्वचिकित्सासम्बद्धविषयस्योल्लेखो विद्यते। तत्र चोष्णवारिणा सह हिङ्गुपुष्करमूलं नागरं साम्लवेतसं पिप्पलीसैन्धवयुतं शूलघ्नं भवति। पिप्पलीसैन्धवयुतं हिङ्गुपुष्करमूलं नागरं उष्णवारिणा गृह्यते चेत् शूलघ्नं भवति। नागरातिविषा मुस्ता सानन्ता बिल्वमालिकैषां क्वाथं वाजी पिबेच्चेत् सर्वातीसारनाशनम् भवति। एवमेव प्रियङ्गुसारिकाभ्यां युक्तं पर्याप्तशर्करं पीत्वा वाजी श्रमाद्विमुच्यते। यथा च–

(हिङ्गुपुष्करमूलञ्च नागरं हिङ्गुपुष्करमूलम्॥ पिप्पलीसैन्धवयुतं शूलघ्नं चोष्णवारिणा॥

नागरातिविषा मुस्ता सानन्ता बिल्वमालिका॥ क्वाथमेषां पिबेद्वाजी सर्वातीसारनाशनम्॥

प्रिङ्गुसारिवाभ्यां च युक्तमाजं श्रृतं पयः ॥ पर्याप्तशर्करं पीत्वा श्रमाद्वाजी विमुच्यते ॥ व्यासः २०६७ अग्निपुराणम् अध्यायः २८९, श्लोकः १२–१५, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

एवमेव २९० तमेऽध्यायेऽश्वशान्ति २९१ तमेऽध्याये गजशान्ति २९२ तमेऽध्याये शान्त्यायुर्वेदः चेत्यादयो विषयाः समुपवर्णिताः सन्ति। तथैव २९५ तमेऽध्याये दंष्टचिकिन्साया विषये वर्णनं विहतमस्ति। यथा च–

साज्यं सकृद्रसं पेयं द्विविधं विषमुच्यते। जङ्गमं सर्पमूषादि शृङ्गादि स्थावरं विषम् ॥ व्यासः२०६७ अग्निपुराणम् अध्यायः २९५, श्लोकः २, विद्यार्थी पुस्तक भण्डार भोटाहिटी काठमाडौं नेपाल )

### ६) गरुडपुराणवर्णितप्रसङ्गः

चिकित्साविज्ञानप्रतिपादकेषु पुराणेषु गरुडपुराणस्य नाम सर्वोपरि समायाति। तस्मिन् पुराणे चिकित्साविषयस्य वर्णनं सर्वाधिकरूपेण समुपलभ्यते। अस्य पुराणस्याचारकाण्डस्य १४६ तमेऽध्याये समासेन रोगाणां सामान्यतो निदाननिरूपणं विहितमस्ति। तत्र ज्वरोनामानि प्रदर्शितानि सन्ति। यथा–

(रोगः पाप्मा ज्वरो व्याधिर्विकारो दुष्ट आमयः। यक्ष्मातङ्कगदा बाधाः शब्दाः पर्यायवाचिनः ॥

संख्याविकल्पप्राधान्यबलकालविशेषतः। सा भिद्यते यथात्रैव वक्ष्यन्तेऽष्टौ ज्वरा इति ॥

व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १४६, श्लोकः २, १०, नागप्रकाशन, दिल्ली)

तथैवाचारकाण्डस्य १४७ तमेऽध्याये अग्निवेश्यहारीतमतानुसारेण कफवातपित्तजज्वरलक्षणनिरूपणं विहितमस्ति। तस्याध्यायस्य चतुर्थपद्यतः अष्टमपद्यपर्यन्तं लिखितविषयाणामवलोकनमित्थमवलोकितुं शक्यते–

हृल्लासश्छर्दनं कासः स्तंभः शैत्यं त्वागादिषु। अङ्गेषु च समुद्भूताः पिडकाश्च कफोद्भवे ॥

काले यथास्वं सर्वेषां प्रवृत्तिर्वृद्धिरेव वा। निदानोक्तोनुपशयो विपरीतोपशायिता ॥

अरुचिश्चाविपाकश्च स्तंभमालस्यमेव च। हृद्दाहश्च विकाकश्च स्तंभमालस्यमेव च। वस्तिर्विमर्दावनया दोषाणाम-प्रवर्त्तनम्। लालाप्रसेको हृल्लासः क्षुन्नाशो रसदं मुखम्। स्वच्छमुष्णगुरुत्वञ्च गात्राणां बहुमूत्रता। न विजीर्णं न च म्लानिर्ज्वर स्यामस्य लक्षणम्। क्षुत्क्षामता लघुत्वं च गात्राणां ज्वरमार्दवम्। दोषप्रवृत्तिरष्टाहान्निरामज्वरलक्षणम्। व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १४६, श्लोकः ४–८, नागप्रकाशन, दिल्ली)

आचारकाण्डस्यैव अध्यायः १४८तमेऽध्याये संक्षेपेण रक्तपित्तरोगनिदानलक्षणोपायादिनिरूपणं नयनगोचरीभवति। कफाद्यस्माद्रूर्ध्वं द्विरेचनसाधितम् साध्यं भवति। बह्वौषधानि तु पित्तस्य विरेचको वरौषधं भवति। यत्र कफोऽनुबन्धी तत्र तस्यापि शुद्धिकृद्भवति। यस्य विशुद्धौ कषायाः स्वादवो श्लेष्मला हिता भवन्ति। ये कटुतिक्तकषाया वा निसर्गात्कफावहाः सन्ति। अधो याप्यञ्च नायुष्मांतप्रच्छर्दनसाधकमस्ति ।यथा च गरुडपुराणे–

“अल्पौषधञ्च पित्तस्य वमनं नावमौषधम्। अनुबन्धि बलं यस्य शान्तपित्तनरस्य च ॥

कषायश्च हितस्तस्य मधुरा एव केवलम्। कफमारुतसंस्पृष्टमसाध्यमुपनामनम् ॥” व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १४८, श्लोकः ९–१३, नागप्रकाशन, दिल्ली)

आचारकाण्डस्यअध्यायः १४९ तमेध्याये प्रथमपद्य एव आशुकारी यतः कासः स एवातः प्रवक्ष्यते। पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः चेत्युक्तिभिः कासरोगनिदानलक्षणोपायादिनिरूपणं विहितमस्ति।

आचारकाण्डस्यअध्यायः १५० तमेऽध्याये प्रथमपद्ये अथातः श्वासरोगस्य निदानं प्रवदाम्यहम्। कासवृद्ध्या भवेच्छवासः पूर्वैर्वा दोषकोपनैः ॥ इति निगद्य श्वासरोगनिदानलक्षणोपायादिनिरूपणं कृतमस्ति।

पुनश्चास्यैव काण्डस्य १५१तमेऽध्याये पद्यद्वये हिक्कारोगनिरूपणं कथं भवतीतिविषयस्य वर्णनमुपलभ्यते। तत्र प्रदर्शतप्रसङ्गमित्थमवलोकितुं शक्यते–

हिक्कारोगनिदानञ्च वक्ष्ये सुश्रुत तच्छृणु। श्वासैकहेतुः प्राग्रूपं संख्या प्रकृतिसंश्रया ॥

हिक्का भक्ष्योद्भवा क्षुद्रा यमला महतीति च। गम्भीरा च मरुत्तत्र त्वरया युक्तिसेवितैः ॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५१, श्लोकः १–२, नागप्रकाशन, दिल्ली)

पुनश्चास्यैव काण्डस्य १५२ तमेऽध्याये राजयक्ष्मरोगनिदाननिरूपणमित्थं प्रदर्शितमस्ति–

राजयक्ष्मा क्षयः शोषो रोगराडिति कथ्यते। नक्षत्राणां द्विजानाञ्च राज्ञो भूद्यदयं पुरा ॥

यच्च राजा च यक्ष्मा च राजयक्ष्मा ततो मतः। देहौषधक्षयकृतेः क्षयस्तत्सम्भवाच्च सः ॥ व्यासः, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५२, श्लोकः२–३, नागप्रकाशन, दिल्ली)

पुनश्च १५३तमेऽध्याये अरोचकरोगनिदाननिरूपणं तथा सन्निपातरोगनिरूपणञ्च दृश्यते। तत्र निरूपित-विषयश्चेत्थमवलोक्यते–

(अरोचकनिदानन्ते वक्ष्येऽहं सुश्रुताधुना। अरोचको भवेद्दोषैर्जिह्वाहृदयसंश्रयैः ॥

सन्निपातेन मनसः सन्तापेन च पञ्चमः। कषायतिक्तमधुरं वातादिषु मुखं क्रमात् ॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५३, श्लोकः१–२, नागप्रकाशन, दिल्ली)

१५४तमेऽध्याये प्रथमपद्यतश्चतुर्थपद्ययर्यन्तं च हृद्रोगाम्लपित्तादिरोगनिरूपणं विहितमस्ति।

हृद्रोगादिनिदानं ते वक्ष्येऽहं सुश्रुताधुना। कृमिहृद्रोगलिंगैश्च स्मृताः पञ्च तु हृद्गताः ॥

वातेन शून्यतात्यर्थं भुज्यते रोरुदीति च। भिद्यते शुष्यते स्तब्धं हृदयं शून्यता भ्रमः ॥

अकस्माद्दीनता शोको भयं शब्देसहिष्णुता। वेपथुर्वेपनान्मोहः श्वासरोधोऽल्पनिद्रता ॥

पित्तातृष्णा श्रमो दाहो स्वेदोम्लकफजः क्रमः। छर्दनं ह्यम्लपित्तस्य धूमकल्पितको ज्वरः ॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५४, श्लोकः१–४, नागप्रकाशन, दिल्ली)

१५५ तमेऽध्याये मदात्ययादिनिदानलक्षणनिरूपणं कृतमस्ति। तत्र

वक्ष्ये मदात्ययादेश्च निदानं मुनिभाषितम्। तीक्ष्णाम्लरूक्षमुक्ष्माम्लव्यवायासुकरं लघु ॥

नातिमाद्यन्ति बलिनः कृताहारा महाशनाः। वातात्पित्तात्कफात्सर्वैर्भवेद्रोगो मदात्ययः ॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५५, श्लोकः१,–१०, नागप्रकाशन, दिल्ली)

१५६ अर्शोनिदानलक्षणनिरूपणं विहितमस्ति। तत्रार्शो लक्षणं तस्य निदानञ्च परिवर्णितमस्ति।

अर्शांसि तस्मादुच्यन्ते गुदमार्गनिरोधनात्। दोषस्त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन् ॥

मांसांकुरानपानादौ कुर्वन्त्यर्शांसि ताञ्जगुः। सहजन्मान्तरोत्थेन भेदो द्वेधा समासतः॥ व्यासः,२००२ गरुड-पुराणम्, आचारकाण्डः, अध्यायः १५६, श्लोकः२–३, नागप्रकाशन, दिल्ली)

एवमेव १५७ तमेऽध्याये द्वितीयपद्यतश्चतुर्थपद्यपर्यन्तमतिसाररोगनिदानलक्षणादिनिरूपणं कृतमस्ति।

अतीसारः स सुतरां जायतेत्यम्बुपानतः। विशुष्कान्नवसास्नेहतिलपिष्टविरूढकैः॥

मद्यरूक्षातिमात्रादि रसातिस्नेहविभ्रमात्। कृमिघोषविरोधाच्च तद्विधेः कुपितोनिलः।

विस्रंसयत्यधोवातं हत्वा तेनैव चानलम्। व्यापार्यान्नशकृत्कोष्टपुरीषद्रवतादयः॥ व्यासः,, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५७, श्लोकः२–४, नागप्रकाशन, दिल्ली)

१५८ तमेऽध्याये प्रथमद्वितीयतृतीयसप्तमेषु पद्येषु मूत्राघातमूत्रकृच्छ्ररोगनिदाननिरूपणमत्थमुपदिष्टमस्ति–

“अथातो मूत्रघातस्य निदानं श्रृणु सुश्रुत। वस्ति वस्ति शिरामेढ्रकटीवृषणपायु च॥

एक संवहनाः प्रोक्ता गुदास्थिविवराश्रयाः। अधोमुखोऽपि वस्तिर्हि मूत्रवाहिशिरामुखैः॥

पार्श्वेभ्यः पूर्यते श्लक्ष्णैः स्यन्दमानैरनारतम्। तैस्तैरेव प्रविश्यैवं दोषान्कुर्वन्ति विंशतिम्॥

मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्मात्। सञ्जायतेश्मरी घोरा पित्तं गोरिव रोचना॥” व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५८, श्लोकः१–३, ७, नागप्रकाशन, दिल्ली)

१५९ तमेऽध्याये द्वितयतः षष्ठपद्यपर्यन्तं प्रमेहरोगनिदाननिरूपणं तथा तेषां प्रकारश्च प्रतिपादितमस्ति। यथा

प्रमेहा विंशतिस्तत्र श्लेष्मणो दश पित्ततः॥ षट्चत्वारोऽनिलात्ते च मेदो मत्र कफावहाः। हारिद्रमेही कटुकं हरिद्रासन्निभं शकृद्भवति। यथा च–

“विस्रं माञ्जिष्ठमेहे च मञ्जिष्ठासलिलोपमम्। विस्रमुष्णं सलवणं रक्ताभं रक्तमेहतः॥

वसामेहि वसामिश्रं वसाभं मूत्रयेन्मुहुः। मज्जाभं मज्जमिश्रं वा मज्जमेही मुहुर्मुहुः॥

हस्ती मत्त इवाजस्रं मूत्रं वेगविवर्जितम्। सलसीकं विवद्धं च हस्तिमेही प्रमेहति॥

मधुमेही मधुसमं जायते स किल द्विधा। क्रुद्धे धातुक्षयाद्वायौ दोषावृतपथे यदा॥” व्यासः, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १५९, श्लोकः३–६, नागप्रकाशन, दिल्ली)

१६० तमेऽध्याये प्रथमद्वितीयतृतीयपद्यपर्यन्तं विद्रधिगुल्मरोगनिदाननिरूपणं विहितमस्ति। यथा च

भुक्तैः पर्युषितात्युष्णशुष्करूक्षविदाहिभिः॥ जिह्मशय्याविचेष्टाभिस्तैस्तैश्चासृक्प्रदूषणैः॥ दुष्टस्त्वङ्गांसमेदोस्थि-मदामृष्टोदराश्रयः॥ यः शोथो बहिरन्तश्च महाशूलो महारुजः। वृत्तः स्यादायतो यो वा स्मृतो रोगः स विद्रधिः॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६०, श्लोकः१–३, नागप्रकाशन, दिल्ली)

१६१ तमेऽध्याये प्रथमतस्तृतीयपद्यपर्यन्तमुदररोगनिदानलक्षणोपायादिनिरूपणं दृश्यते।

रोगाः सर्वेपि मन्दाग्नौ सुतरामुदराणि तु। अजीर्णामयाश्चाईयन्ये जायन्ते मलसञ्चयात्। उर्द्धाधो वायवो रुद्धा व्याकुलाविप्रवाहिणी। प्राणानपानान्संदूष्य कुर्य्युस्तान्मांससन्धिगान्। आध्माप्य कुक्षिमुदरमष्टधा ते च भेदतः। व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६१, श्लोकः१–३, नागप्रकाशन, दिल्ली)

१६२ तमेऽध्याये पाण्डुशोथरोगनिदाननिरूपणं विहितमस्ति। तत्र पित्तकुपिते पाण्डुशोथरोगः समुत्पद्यत इत्युल्लिख्य तेन रोगेण कलेवरे कीदृशी स्थितिर्जयत इत्यादि सम्यग्रूपेण प्रतिपादितमस्ति। यथा च कतिचित् पद्यानि–

पाण्डुशोथनिदानञ्च श्रृणु सुश्रुत वच्मि ते। पित्तप्रधानाः कुपिता यथोक्तैः कोपनैर्मलाः॥

तत्रानिलेन बलिना क्षिप्ताक्षिप्तं यदि स्थितम्। धमनीर्दशमीः प्राप्य व्याप्नुवन्सकलां तनुम्॥

त्वगसृक्श्लेष्ममांसानि प्रदूष्यत्र समाश्रितम्। त्वङ्गांसयोस्तु कुरुते त्वचि वर्णान् पृथग्विधान्॥ व्यासः,, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६२, श्लोकः१–३, नागप्रकाशन, दिल्ली)

१६३ तमेऽध्याये विसर्परोगनिदानलक्षणोपायादिनिरूपणं विस्तरेण विहितमस्ति। तत्र दुष्टैर्दोषैर्विघातात् विसर्परोगो जयत इत्युल्लिख्य तस्य लक्षणं तथोपचारविधिरपि समुल्लिखितमस्त्यस्मिन्नध्याये। उदाहरणार्थं मद्यमेकमित्थमवलोकितुं शक्यते–

स्याद्विसर्पो विघातात्तु दोषैर्दुष्टैश्च शोधवत्॥ अधिष्ठानञ्च तं प्राहुर्वाह्यं तत्र भयाच्छ्रमात्॥॥ व्यासः,२००२ गरुड-पुराणम्, आचारकाण्डः, अध्यायः १६३, श्लोकः१, नागप्रकाशन, दिल्ली)

१६४ तमेऽध्याये कुष्ठरोगनिदानलक्षणनिरूपणं कृतमस्ति। तत्र कुष्ठरोगस्योत्पत्तिर्मिथ्याहारविहारेण विरोधिनासाधु-निन्दावधाद्युद्धहरणाद्यैः प्राक्तनैः पापकर्मभिः समुत्पद्यत एष रोग इत्युल्लिख्यास्य रोगस्य लक्षणोपचारादिविधिरपि विस्तरेण समुपवर्णितमस्ति। अत्रोदाहरणार्थं कतिपयानि पद्यानि चेत्थमवलोकितुं शक्यते–

मिथ्याहारविहारेण विशेषेण विरोधिना। साधुनिन्दावधाद्युद्धहरणाद्यैश्च सेवितैः॥ पाप्माभिः कर्मभिः सद्यः प्राक्तनैः प्रेरितामलाः। शिराः प्रपद्य तैर्युक्तास्त्वग्वसारक्तमामिषम्॥ दूषयन्ति च संशोष्य निश्चरन्तस्ततो वहिः। त्वचः कुर्वन्ति वैवर्ण्यं शिष्टाः. कुष्टमुशन्ति च॥ व्यासः, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६४, श्लोकः१–३, नागप्रकाशन, दिल्ली)

१६५ तमेऽध्याये बाह्याभ्यन्तरकृमिरोगनिदाननिरूपणक्रमे कृमिरोगस्य लक्षणं बाह्याभ्यन्तरभेदेन द्विविधत्वं तथा तयोः समुत्पत्तिकारणादीनां वर्णनं विधाय तस्य रोगस्य निदानोपचारादिविधिरपि वर्णितमस्ति। उदाहरणार्थं द्वे पद्ये चेत्थमवलोक्येते–

कृमयश्च द्विधा प्रोक्ता वाह्याभ्यन्तर भेदतः। बहिर्मलकफासृग्विट्जन्मभेदाच्चतुर्विधाः॥ नामतो विंशतिविधा बह्यास्तत्र मलोद्भवाः॥ तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६५, श्लोकः१–२, नागप्रकाशन, दिल्ली)

१६६ तमेऽध्याये वातव्याधिरोगनिदाननिरूपणं दृष्टिगोचरीभवति। तत्रापि रोगोत्पत्तिकारणं तस्य लक्षणनिदानोप-चारादिवर्णंनं सम्यग्रूपेण विहितमस्ति। यथा च पद्यमेकम्–

धातुक्षयकरैर्वायुः क्रुद्धो नातिनिषेव्यते। चतुः स्रोतोऽवकाशेषु भूयस्तान्येव पूरयेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६६, श्लोकः६, नागप्रकाशन, दिल्ली)

१६७ तमेऽध्याये वातरक्तदोषनिदाननिरूपणं दृष्टिगोचरीभवति। तत्रापि रोगोत्पत्तिकारणं तस्य लक्षणनिदानो-पचारादिवर्णंनं सम्यग्रूपेण विहितमस्ति। संक्षेपे यथा–

विरुद्धाध्यशक्रोधदिवास्वप्नप्रजागरैः ॥ प्रायशः सुकुमाराणां मिथ्याहारविहारिणाम्। स्थूलानां सुखिनां चापि कुप्यते वातशोणितम्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १६७, श्लोकः१–२, नागप्रकाशन, दिल्ली)

१६८ तमेऽध्याये सामान्यतो बैद्यशास्त्र परिभाषानिरूपणं कृतमस्ति। अत्र सर्वरोगहरस्य सिद्धयोगसारस्य परिचय-प्रदानकार्यं तथोपचारादिनिरूपणं विहितमस्ति। एवमेव १६९ तमेऽध्याये सर्वरोगाणां हिताहितविवेककार्यानुपानविधि-निरूपणं विशदरूपेणा कृतमस्ति। तत्रानुपानादिविधेरपि वर्णनं विहितमस्ति।

१७० तमेऽध्याये कफवातपित्तजनितज्वररोगचिकित्सानिरूपणं कृत्वा तस्य निदानोपचारादिनिरूपणं विशदरूपेणा कृतमस्ति। तत्रापि ज्वरोष्टधेति सुश्रुतवत् वर्णनं समुपलभ्यते। ज्वरोष्टधा पृथग्द्वन्द्व सङ्घातागन्तुजः स्मृतः। अत एव मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः पिपासाज्वरशान्तये श्रतशीतं जलं दद्यात्। ज्वरिताय पाचनकं पूर्वं ज्वरापहन्नागरं धान्याकं बृहतीद्वयं देवकाष्ठञ्च दद्यात्। सामे सशूले आरग्वधाभयामुस्तातिक्ताग्रन्थिकनिर्मितः कषायः पाचनश्च ज्वरे हितकरो भवति। मधूकसारसिन्धूत्थवचोषणकणाः समाः श्लक्ष्णं पिष्ट्वाम्भसा नस्यं कुर्य्यात् तेन प्रज्ञाप्रबोधनं भवति। त्रिवृद्विशाला त्रिफला कटुकारग्वधैः कृतः सक्षारो भेदनः क्वाथः सर्वज्वरापहः पेयो मन्यते। एवमेवोक्तञ्च गरुडपुराणे–

“महौषधामृतामुस्तचन्दनोशीरधान्यकैः। क्वाथस्तूतीयकं हन्ति शर्करामधुयोजितः॥

अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः। बद्धवा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम्।” व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १७०, श्लोकः६–७, नागप्रकाशन, दिल्ली)

१७१ तमेऽध्याये नाडीव्रणरोगचिकित्सानिरूपणं कुष्ठरोगचिकित्सानिरूपणाम्लपित्तचिकित्सानिरूपणं कृतमस्ति। एवमेव तस्य निदानोपचारादिविधिरपि वर्णितमस्ति। यथा च–

गुग्गुलु त्रिफलाव्योषैः समर्शिराज्ययोजितैः। नाडीदुष्टव्रणं शूलं भगन्दरमथो नयेत्॥२॥ व्यासः,, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १७१, श्लोकः२, नागप्रकाशन, दिल्ली)

१७२ तमेऽध्याये स्त्रीरोगचिकित्सानिरूपणं कृत्वा तस्य निदानोपचारादिनिरूपणं विशदरूपेणा कृतमस्ति।

योनिव्यापत्सु भूयिष्ठं शस्यते कर्मवातजित्॥ वचोपकुञ्चिकाजातीकृष्णावासकसैन्धवम्। अजमोदा यवक्षारं चित्रकं शर्करान्वितम्॥ पिष्ट्वा लोड्य जलाद्यैश्च खदयेद्धृतभर्जितम्। योनिपार्श्वार्त्तिहृद्रोगगुल्मार्शो विनिवर्त्तयेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १७२, श्लोकः१–३, नागप्रकाशन, दिल्ली)

१७३ तमेऽध्याये रोगहरमधुरादिद्रव्यनिरूपणं लक्षणं निदानोपचारादिविधिरपि समुपवर्णितमस्ति। यथा–

द्रव्याणि मधुरादीनि वक्ष्ये रोगहराण्यहम्। शालिषष्टिकगोधूमक्षीरं घृतरसो मधुः॥ मज्जाश्रृङ्गाटकयवकशेर्विवारु-गोक्षुरम्। गम्भारी पौष्करं बीजं द्राक्षा खर्जूरकं वला॥ व्यासः, गरुडपुराणम्, आचारकाण्डः, अध्यायः १७३, श्लोकः१-२, नागप्रकाशन, दिल्ली, २००२)

१७४ तमेऽध्याये मेधाजनकब्राह्मीघृतविधिनिरूपणम् वायुभग्नगात्रोपयोगिनारायणतैलविधिनिरूपणम् गण्डमाला-पहार्याजमोदातैलनिरूपणञ्च कृत्वा तेषामुपचारविधिरपि प्रकाशितास्ति। यथा–

शंखपुष्पी वचा सोमा ब्राह्मी ब्रह्मसुवर्चला। अभया च गुडूची च अटरूपकवागुजी। एतैरक्षसमैर्भागैर्घृतप्रस्थं विपाचयत्॥ कण्टकार्या रसप्रस्थक्षीरप्रस्थसमन्वितम्। एतद्ब्राह्मीघृतं नाम श्रुतिमेधाकरं परम्॥ व्यासः,२००२ गरुड-पुराणम्, आचारकाण्डः, अध्यायः १७४, श्लोकः१–३, नागप्रकाशन, दिल्ली)

एवमेव१७५ तमेऽध्याये धन्वन्तरिप्रयुक्तयोगकथनानन्तरं हरिप्रयुक्तयोगेषु ज्वरहरनानाविधयोगनिरूपणं तथा १७६ तमेऽध्याये सप्तरात्रात्खल्वाटस्यापि केशोत्पत्तिकरस्य भृंगराजतैलस्य विधिकथनम् कर्णरोगहारिदेवदारुतैलकथनम् लिङ्ग-वाहुस्तनकर्णवृद्धिकारिकुष्ठादिलेपकथनञ्च वर्णितमस्ति। १७७ तमेऽध्याये नेत्ररोगहराञ्जनादिकथनं कामलाविनाशको-पायकथनं डाकिनीमातृकाब्रह्मराक्षसपीडानिवारकनस्य निरूपणं मक्षिकामशकविनाशकधूपनिरूपणम् १७८ तमेऽध्याये स्त्रीपुरुषवशीकरणधूपलेपतिलकताम्बूलादिनिरूपणम् १७९ तमेऽध्याये कर्णस्रावनाशकमूलकरसनिरूपणं अजीर्ण-विषूचिकाहरगुटिकानिरूपणम् १८० तमेऽध्याये कामवन्महीविचरणार्थं धूपनिरूपणम् स्त्रीवशीकरणादेपकथनं योनिसंकोच-करगुटिकाकथनं चातुर्थिकहरधूपकथनं कशकनाशकधूपकथनञ्च १८१ तमेऽध्याये चक्षुःशूलहरद्रव्यकथनं लोमशातन-लेपकथनं दन्तशोधनद्रव्यनिरूपणञ्च १८२ तमेऽध्याये परिणामशूलाजीर्णनाशकक्वाथनिरूपणं अग्निस्तंभनयोगनिरूपणं जलस्तम्भनयोगकथनं रिपूच्चाटनकथनं गुल्मनाशकलेपकथनं रक्तातिसारनाशकपेयकथनञ्च १८३ तमेऽध्याये ज्वर-हरमन्त्रनिरूपणं सर्वज्वरहरधूपनिरूपणं कुष्ठनाशकलेपकथनम्१८४ तमेऽध्याये अदृश्यकारकधूपकथनं रौप्यस्वर्णकर-योगकथनं शिरशूलविनाशकलेपकथनं वातपित्तजशूलहिरक्वाथकथनम् १८५ तमेऽध्याये अक्षिरोगहरवर्त्तिकादि-निरूपणम्१८६ तमेऽध्याये गण्डमालाहरलेपकथनं भगन्दरविनाशकलेपकथनं अग्निवृद्धिकरचूर्णादिनिरूपणम्१८७ तमे-ऽध्याये सर्वरोगहरैकयोगकथनं पयोदधिगुणकथनञ्च प्रतिपादितमस्ति।

१८८ तमेऽध्याये नाडीव्रणापहयोगकथनं विद्रधिनाशकयोगकथनं ग्रहहराञ्जनधूपादिकथनञ्च समुपवर्णितमस्ति। तत्रोल्लिखितानां पद्यानां मध्ये पद्यद्वयस्योपस्थापनमित्थं कर्तुं शक्यते–

अपामार्गस्य वै मूलं हस्ताभ्याभ्याञ्च विमर्दितम्। तद्रसेन प्रहारस्य रक्तस्रावो न पूरणात्॥

रुद्र लाङ्गलिकामूलं चेक्षुदर्भस्तथैव च॥ तेन ब्रणमुखं लिप्तं शल्यं निःसरति ब्रणात्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १८८, श्लोकः१–२, नागप्रकाशन, दिल्ली)

१८९ तमेऽध्याये स्त्रीगुल्मशूलहरयोगकथनम् धवलगुञ्जामूलपुष्पयोगकथनम् विष्णुक्रान्तामूलयोगकथनञ्च वर्णितमस्ति। तत्रोल्लेखः–

नारी पुष्पदिने पीत्वा गोक्षीरेणोपवासतः॥ श्वेतार्कस्य तु वै मूलं तस्यास्तद्गुल्मशूलनुत्॥

श्वेतार्कपुष्पं विधिना गृहीतं पूर्वमन्त्रितम्॥ ऋतुशुद्धा च ललना कटौ बद्धा प्रसूयते॥

हस्तबद्धं पलाशस्य अपामार्गस्य वा हर॥ मूलं सर्वज्वरहरं भूतप्रेतादिनुद्भवेत्॥ व्यासः, २००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १८९, श्लोकः३–५, नागप्रकाशन, दिल्ली)

१९०तमेऽध्याये सिध्मरोगविनाशिरम्भापामार्गाभ्यञ्जनकथनम् दुर्गन्धिनाश्युद्वर्तनकथनम् रक्तपित्तकामलापाण्डु-रोगहरयोगकथनम् कासहरधूमपानकथनञ्च प्रतिपादितमस्ति। तस्य रोगस्य नराकरणविषये चेत्थं लिखितमस्ति–

मधुयष्टी शर्करा च वासकस्य रसो मधु॥ एतत्पीतं रक्तपित्तकामलापाण्डुरोगनुत्॥

रक्तपित्तं हरेत्पीतो वासकस्य रसो मधु॥ प्रातः काले तोयपानात्पीनसं दारुण हरेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १९०, श्लोकः३–२६–२७, नागप्रकाशन, दिल्ली)

१९१ तमेऽध्याये विषहरलेपकथनम् वृश्चिकविषहरयोगकथनम् कुक्कुरविषहरलेपकथनम् लूतादिविषहरयोगादि-कथनञ्चोल्लिखितमस्ति। यथा–

तण्डुलीयकमूलं च पिष्टं तण्डुलवारिणा॥ घृतेन सह पीतन्तु हरेत्सर्वविषाणि च॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १९१, श्लोकः ७, नागप्रकाशन, दिल्ली)

१९२ तमेऽध्याये पाण्डुरोगहरमोदककथनम् वातविकारहारितैलयोगकथनम् चिरकालभवव्रणहरतैलादि-निरूपणञ्च कृत्वा तस्य रोगस्य लक्षणनिदानोपचारादिवर्णनं विहितमस्ति। उदाहरणार्थं पद्यद्वयं यथा–

अष्टौ कुशलिकाभागास्त्रिफलायाश्चतुष्टयम्॥ द्विगुणेन गुडेनैषां मोदकानिह कारयेत्॥

तद्भक्षणमजीर्णं हि पाण्डुरोगञ्च कामलम्। अतिसारांश्च मन्दाग्निं प्लीहाञ्चैव निवारयेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः १९२, श्लोकः २,३, नागप्रकाशन, दिल्ली)

१९३ तमेऽध्याये निर्मलमतिकरचूर्णकथनम् ज्वरोन्मादहरधूपकथनम् सर्वरोगहरविष्णुभजनपूजनादिकथनञ्च विशदरूपेण स्थापितमस्ति। यथा–

पलाण्डुजीरके कुष्ठमश्वगन्धाजमोदकम्॥ वचा त्रिकटुकञ्चैव लवणं चूर्णमुत्तमम्॥

ब्राह्मीरसैर्भावितञ्च सर्पिर्मधुसमन्वितम्॥ सप्ताहं भक्षितं कुर्यान्निर्मलाञ्च मतिं पराम्॥ व्यासः, २००२, गरुडपुराणम्, आचारकाण्डः, अध्यायः १९३, श्लोकः १,२, नागप्रकाशन, दिल्ली)

२०१ तमेऽध्याये तुरङ्गगजायुर्वेदस्य संक्षेपेण निरूपणं कृत्वाश्वायुर्वेदस्य परिचयप्रदानकार्यं कृतमस्ति। संक्षेपे यथा–

गजरोगविनाशाय हितो रूक्षः कषायकः। आयुर्वेदद्वयोक्तानामुक्तं संक्षेपसारतः॥३९॥॥ व्यासः,२००२ गरुड-पुराणम्, आचारकाण्डः, अध्यायः २०१, श्लोकः ३९, नागप्रकाशन, दिल्ली)

तथैव २०२ तमेऽध्याये योनिशूलहरयोगनिरूपणम् जराहरणयोगनिरूपणम् वाजीकरणयोगकथनञ्च प्रतिपादित-मस्ति। तत्रोल्लेखः–

एकं पुनर्नवामूलमपामार्गस्य वा शिव। सरसं योनिनिःक्षिप्तं वराङ्गस्य व्यथां हरेत्॥ प्रसूतिवेदनाञ्चैव तरुणीनां व्यथां हरेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः २०२, श्लोकः १, नागप्रकाशन, दिल्ली)

२०३ तमेऽध्याये चतुष्पदादीनां नानौषधप्रयोगविधिनिरूपणं कृतमस्ति। अनेन निखिलानामपि पशूनामुपचारः कथं सम्भाव्यत इतिविषयस्य ज्ञानं सरलतया प्राप्तुं शक्यते। यथा चोदाहरणम्–

या गौर्द्वेष्टि स्वकं वत्सं तस्या देयं स्वकं पयः॥ लवणेन समायुक्तं तस्या वत्सः प्रियो भवेत्॥ व्यासः,२००२ गरुडपुराणम्, आचारकाण्डः, अध्यायः २०३, श्लोकः १, नागप्रकाशन, दिल्ली)

पुनश्चान्ते २०४ तमेऽध्याये वन्यौषधिनामनिरूपणं विधाय सर्वेषामपि जनानां चिकित्साविषयस्य ज्ञानार्जने सरलतयोपायः समुपस्थापित इत्यनुभूयते। यथा च कतिपयानि पद्यानि लेखकस्य शब्देषु–

"स्थिरा विदारिगन्धा च शालपर्ण्यशुमत्यपि। लाङ्गली कलसी चैव क्रोष्टुपुच्छा गुहा मता॥

पुनर्नवाथ वर्षाभूः कठिल्या कारुणा तथा। एरण्डश्चोरुवूकः स्यादामर्द्दो वर्द्धमानकः॥

झषा नागबला ज्ञेया शवदंष्ट्रा गोक्षुरो मतः। शतावरी वरा भीरु पीवरीन्दीवरी वरी॥

व्याघ्री तु बृहती कृष्णा हंसपादी मधुस्रवा। धामनी कण्टकारी स्यात्क्षुद्रा सिंही निदिग्धिका॥" व्यासः२००२, गरुडपुराणम्, आचारकाण्डः, अध्यायः २०४, श्लोकः ३–५, नागप्रकाशन, दिल्ली)

## निष्कर्षः

निष्कर्षतां यातेऽस्मिन् लेखे महापुराणेषु चिकित्साविज्ञानस्योल्लेखः कस्मिन् कस्मिन् पुराणे वर्तत इति निदर्श्य सामान्यतो ब्रह्मपुराणे तथा लिङ्गपुराणे किञ्चित्मात्रं चिकित्साविषयस्योल्लेखो वर्तत इति प्रतिपादितमस्ति। तथैवाग्निपुराणे तथा गरूडपुराणे तु चिकित्साविज्ञानस्य वर्णनं विशदरूपेण विहितमस्तीति समुपस्थापितमस्ति। वर्तमान समाजे पुराणवर्णितस्य चिकित्साविज्ञानस्यानुगमनं विधीयते चेत् सर्वेषामपि रोगाणां न केवलं निदानमपि तु तेषामुपचारोऽपि स्वल्पेनैवार्थेन सम्भाव्यत इति धिया सामाजिकक्षेत्र एतेषां विषयाणां ज्ञानसञ्चरो भवितुमर्हतीति निष्कर्षः स्यादिति दिक्।

## सन्दर्भसामग्रीसूची


कल्याण, २०६१ संक्षिप्त गरुडपुराणाङ्कः, पञ्चमसंस्करणम्, गीताप्रेस, गोरखपुर,

चरकः, वि सं २०७७ चरकसंहिता, चौखम्बा कृष्णदास अकादमी, वाराणसी,

व्यासः, २०६७ अग्निपुराणम्, विद्यार्थी पुस्तक भण्डार, भोटाहिटी, काठमाडौं, नेपाल

व्यासः,२००२ गरुडपुराणम्, नागप्रकाशन, दिल्ली,

व्यासः,२०२० ब्रह्ममहापुराणम् , नागप्रकाशन, दिल्ली,

व्यासः२०७८ लिङ्गमहापुराणम्, गीताप्रेस, गोरखपुर,

सुश्रुतः, वि सं २०७७ सुश्रुतसंहिता, चौखम्बा कृष्णदास अकादमी, वाराणसी,